# Devikritam 1 Shiva Stotram

# देवीकृतं १ शिवस्तोत्रम्

## Document Information

Text title : Devikritam 1 Shiva Stotram

File name : devIkRRitaM1shivastotram.itx

Category : shiva, skandapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : skandapurANa | prabhAsakhaNDa | adhyAya 3/41-50||

Latest update : August 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

August 23, 2025

*sanskritdocuments.org*

# देवीकृतं १ शिवस्तोत्रम्

देव्युवाच ।
जन्मकोटिसहस्राणि जन्मकोटिशतानि च ।
शोधितस्त्वं जगन्नाथ मया प्राणनचिन्तया ॥ ३९॥

अर्द्धाङ्गसंस्थया वापि त्वदङ्कध्यानकाम्यया ।
तथापि ते जगन्नाथ नान्तो लब्ध्वो महेश्वर ॥ १.३.४०॥

अनन्तरूपिणे तुभ्यं देवदेव नमोऽस्तु ते ।
नमो वेदरहस्याय नमो वेदैः स्तुताय च ॥ ४१॥

श्मशानरतिनित्याय नमो गगनचारिणे ।
ज्येष्ठसामरहस्याय शतरुद्रप्रियाय च ॥ ४२॥

नमो वृषकृताङ्काय यजुर्वेदधराय च ।
ब्रह्माण्डकोटिसंलग्नमालिने गगनात्मने ॥ ४३॥

मणिचित्रितकन्दाय नमः सर्वार्थसिद्धये ।
नमो वेदस्वरूपाय द्विजसिद्धिप्रियाय च ॥ ४४॥

पुंस्त्रीविकाररूपाय नमश्चन्द्रार्द्धधारिणे ।
नमोऽग्नये सहोमाय आदित्यवरुणाय च ॥ ४५॥

पृथिव्यै चान्तरिक्षाय वायवे दीक्षिताय च ।
संयोगाय वियोगाय धात्रे कर्त्रेऽपहारिणे ॥ ४६॥

प्रदीप्तशूलहस्ताय ब्रह्मदण्डधराय च ।
नमः पतीनां पतये महतां पतये नमः ॥ ४७॥

नमः कालाग्निरुद्राय सप्तलोकनिवासिने ।
त्वं गतिः सर्वभूतानां भूतानां पतये नमः ॥ ४८॥

नमस्ते भगवन् रुद्र नमस्ते भगवञ्छिव ।

नमस्ते परतः श्रेष्ठ नमस्ते परतः पर ॥ ४९॥

जिह्वाचापल्यभावेन खेदितोऽसि मया प्रभो ।
तत्क्षन्तव्यं महेशान ज्ञानदिव्य नमोऽस्तु ते ॥ १.३.५०॥

इति श्रीस्कन्दपुराणे प्रभासखण्डे प्रभासक्षेत्रमाहात्म्ये तृतीयाध्यायान्तर्गतं
देवीकृतं शिवस्तोत्रं समाप्तम् ।

स्कन्दपुराण । प्रभासखण्ड । अध्याय ३/४१-५०॥

skandapurANa . prabhAsakhaNDa . adhyAya 3/41-50..

Proofread by PSA Easwaran

*Devikritam 1 Shiva Stotram*
pdf was typeset on August 23, 2025

Please send corrections to *sanskrit@cheerful.com*